CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 554

Title Darśapaurṇamāsya prayoga

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 554 Subject: Vedic Rit.

Title: Darśapaurṇamāsyaprayoga

Author: Bhaṭṭa Hośiṅga Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.6" by 4" Extent: 4 fol.

Language: Sanskrit. Script: Devanāgarī

Remarks: Incomplete.

॥श्रीगणेशाय नमः भट्टभट्टहोत्रीगास्ये दैवदर्शपूर्णमासस्य पुस्तकं आरंभः कृतास्वार्थात ॥

॥

नासिष्या गविहितं आहिज्यं करिष्यं करिष्यमाणः पावनपावनमंत्राचमनमंत्रप्रोक्षणे

श्रीगणेशाय नमः ॥ अथ दर्शपूर्णमासप्रयोगो लिख्यते ॥ आहिताग्निरन्वाधानदिने
प्रातरग्निहोत्रं हुत्वारम्भकपपक्षे केशलोमनखानि वापयित्वा कृतेस्नानं नवनीताभ्यं
जनांजनो हतवासाः स्नातेः पत्न्याः च यादिभिः सह प्रत्येकं सप्तभिः सप्तभिर्दर्भपिंजूलैर्मु
खं नाशौच संधुज्य दर्भात्समुच्छिय प्रोक्ष्यो दर्भेरस्य पलपस्वरपतसवनं ॥ आपोहि
ष्ठेति तिसृभिः हिरण्यपः पिबेत् ॥ व्याहृतिभिर्मुखमुन्मृजेदेतद्धविःपरितं ॥ न मंत्राचमनं
ततः शेषं समाप्य मंत्रप्रोक्षणं करोति ॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ॥ सु
सुरभिनो मुखाकरत्प्रण आयूंषि तारिषत ॥ आपोहिष्ठामयोभुवस्तान ऊर्जे दधातन ॥
महेरणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः ॥ उशतीरिव मातरः ॥
तस्मा अरंगमामवो यस्य क्षयाय जिन्वथ ॥ आपो जनयथा च नः ॥ यच्चिद्धि ते विशो

यथा प्रदेव वरुण व्रतं ॥ मिनीमसि द्यविद्यवि ॥ यत्किंचेदं वरुण दैव्ये जने भिद्रोहं मनुष्या१
श्चरामसि ॥ अचित्ती यत्तव धर्मा युयोपिम मानस्तस्मादेनसो देवरीरिषः ॥ कितवासो
यद्रिरिपुर्न दीवि यद्वाघा सत्यमुत यन्नविद्म ॥ सर्वा ता विष्य शिथिरेव देवाधा ते स्याम
वरुण प्रियासः ॥ हिरण्यवर्णाः शुचयः पावकाः यासु जातः कश्यपो यास्विंद्रः ॥ अग्निं
या गर्भं दधिरे विरूपास्तान आपः शं स्योना भवंतु ॥ यासां राजा वरुणो याति मध्ये
सत्यानृते अवपश्यं जनानां ॥ मधुश्चुतः शुचयो याः पावकास्ता न आपः शं स्योना
भवंतु ॥ यासां देवा दिवि कृण्वंति भक्षं या अंतरिक्षे बहुधा भवंति ॥ याः पृथिवीं पयसो
दंति शुक्रास्तान आपः शं स्योना भवंतु ॥ शिवेन मा चक्षुषा पश्यतापः शिवया तन्वो

वोपस्थशतस्त्वंमे । सर्वां जगी ५ रंप्रमुषदो कुवेरामधिवर्च्चो बलमो जोनिधत्त ॥ पवम
नः सुवर्जनः पवित्रेण विचर्षणिः ॥ यः पोता स पुनातु मा ॥ पुनन्तु मा देवजनाः ॥ पुनन्तु म
नवो धिया ॥ पुनन्तु विश्व आयवः ॥ जातवेदः पवित्रवत् ॥ पवित्रेण पुनाहि मा ॥ शुक्रेण
देव दीद्यत् ॥ अग्ने क्रत्वा क्रतूँ रनु ॥ यत्ते पवित्रमर्चिषि ॥ अग्ने विततमन्तरा ॥ ब्रह्म
तेन पुनीमहे ॥ उभाभ्यां देव सवितः पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे ॥ वैश्वदे ॥२॥
२। वी पुनती देव्यागात् । यस्यै बह्वीस्तनुवो वीतपृष्ठाः । तया मदन्तः सधमाद्येषु । वयँ
स्याम पतयो रयीणां ॥ वैश्वानरो रश्मिभिर्मा पुनातु । वातः प्राणेनेषिरो म
यो भूः । द्यावापृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीतां । बृहद्भिः सवितस्तृभिः ।
वर्षिष्ठैर्देव मन्मभिः । अग्ने दक्षैः पुनाहि मा ॥ येन देवा अपुनत । येनापो दिव्यं कशः । तेन दिव्ये

५२

न ब्रह्मणा । इदं ब्रह्म पुनीमहे । यः पावमानीरध्येति । ऋषिभिः संभृतँ रसं ।
सर्वँ स पूतमश्नाति । स्वदितं मातरिश्वना । पावमानीर्यो अध्येति । ऋषिभिः संभृत
ँ रसं । तस्मै सरस्वती दुहे । क्षीरँ सर्पिर्मधूदकं । पावमानीः स्वस्त्ययनीः । सुदुघा हि
पयस्वतीः । ऋषिभिः संभृतो रसः । ब्राह्मणेष्वमृतँ हितं । पावमानीर्दिशन्तु नः ॥
इमं लोकमथो अमुं । कामान्त्समर्धयन्तु नः । देवीर्देवैः समाभृताः ॥ पावमानीः स्वस्त्य
यनीः । सुदुघा हि घृतश्चुतः । ऋषिभिः संभृतो रसः । ब्राह्मणेष्वमृतँ हितं । येन दे
वाः पवित्रेण ॥ आत्मानं पुनते सदा । तेन सहस्रधारेण । पावमान्यः पुनन्तु मा । प्राजाप
त्यं पवित्रं । शतोद्यामँ हिरण्मयं ॥ तेन ब्रह्मविदो वयं । पूतं ब्रह्म पुनीमहे । इन्द्रः सुनी
ती सह मा पुनातु । सोमः स्वस्त्या वरुणः समीच्या । यमो राजा प्रमृणाभिः पुनातु मा ॥
जातवेदा मोर्जयन्त्या पुनातु । कया नश्चित्र आभुवदूती सदावृधः सखा ॥ कया शचि
पोपो·

ऽस्यावेद्व सरनांमनेस्यदुवर्वसः॥ तरस्समंदी धावति॥ २

[illegible]यारता। कस्वा सखोमदूनो [illegible]म शूंशिष्टामस्सदंर्थ सः॥ [illegible] विदार जेवसु॥ अभीषुणः

सखीनामविताजरितॄणां। शतंभवास्यूतिभिः। तरस्समंदी धावति धारासुतस्यांधसः॥

२॥ तरस्समंदी धावति। ध्वस्त्रयोः पुरुषंत्योरासहस्राणिदद्महे। तरस्समंदी धावति॥

आयये त्रिंशतं तनस्सहस्राणि च दद्महे। तरस्समंदी धावति। भूर्भुवः स्वः। इ

तिप्रति मंत्रं प्रोक्षणं कृत्वा पवनादिनाध्वर्युणा संस्कृत्य आपस्यास्य हविर्युत्तराचंतरेण ॥३॥

प्रविश्य गार्हपत्य[illegible]स्य पश्चादुदग्दर्भैनास्तीर्यते पुदक्षिणतः परस्पुतारतः स्वयं

व तदुत्तरतः स्नातापरिणाही प्रक्षालितानाङ्गीमलिनः श्वेतवाससः पवनादिसंस्कृ

ताञ्चत्विज[illegible] वर्षा [illegible]पुरस्तादुपविश्य[illegible]स्याससदर्भो धारयमाणाः प्राणानायम्य

जपति॥ याः पुरस्तात्प्रस्रवंत्युपरिष्टात्सर्वतः श्च याः॥ ताभीरश्मिपवित्राभिः

श्रद्धांयज्ञमारभे। देवा गातुविदोगातुंयज्ञायविंदत। मनसस्पतिनादेवेनवाताद्यज्ञः प्रयु

ज्यतां। श्रद्धऽएहि सत्येन लोकयामि। आकूत्यै त्वा कामाय त्वा समृधे त्वा पुरोदधे अ

मृतत्वाय जीवसे। आकूतिमस्यावसे काममस्य समृध्यै। इंद्रस्य युंजते धियः। आकू

तिंदेवीं मनसः पुरोदधे यज्ञस्य माता सुहवा मे अस्तु। यद्दिच्छामि मनसा सकामो वि

देयमेनद्धृदये निविष्टं। देशकालौ संकीर्त्य अमावास्यायां स्वर्गकामः आमावास्ये

न पौर्णमास्यां पौर्णमासेन हविषा यक्ष्य इति निरूप्य। ऋत्विजश्चैवं कारह। तन्मे समृध्यतां

तन्मे समृध्यतां तन्मे संपद्यतां कामः। ऋत्विजः। तत्ते समृध्यतां तत्ते समृध्यतां तत्ते ४ ॥३

संपद्यतां कामः॥ यजमानः ॐतथेस्तु [illegible] देवतास संकल्पं करोति। अमावा

स्यं हविषः। अग्नीषोमावाज्यभागौ। आग्नेयोष्टाकपालो व्रीहिमयः पुरो

डाशः ऐंद्रं [illegible] वाज्यं ऐंद्राग्न एकादशकपालः पुरोडाशो देवता आज्यप अग्निः

पौर्णमास्यं हविः व्रीहिमयः पुरोडाशो द्रव्यं। आज्यं च। अग्नीषोमावाज्यभागौ। आग्नेयोष्टाकप

डाशः ॥ ध्रुवंधूवाज्यं ॥ अग्नीषोमीय एकादशकपालः पुरोडाशः ॥ ऐंद्रो वैमृधपढु° अग्नि
त्रयोनुयाजाः स्तूक्तवाकशंयुवाकौ चत्वारः पत्नीसंयाजाः एवं दर्शमासयोकेनसो°
स्विष्टकृन्नमित्सोदयोगदेवताः पंचप्रयाजास्त्रयोनुयाजाः चत्वारः अष्टौ वापत्नीसंयाजाः
अग्न्यादयः सर्वाहुत्वैः विष्णुरूपांशु पत्नीसंयाजमंद्रस्वरेण ॥ सोमयाजिनस्तु
ऐंद्राग्नस्थाने ऐंद्रो माहेंद्रो वैकादशकपालः पुरोडाशः ॥ ऐंद्रं माहेंद्रं वा दधि पयश्च प
नित्ययाजिनः सर्वत्र विनिर्दोषः पौर्णमास्यां ध्रुवाज्यनंतरं ॥ अग्नीषोमीय एकाद
४ शकपालः पुरोडाशः ऐंद्रायवैमृधाय एकादशकपालः पुरोडाशः समानमन्यत् ॥ ४५
एवमालभ्यकेन सांगोपांगेन कर्मणा वैमृधसहितेन पौर्णमा
स्यां श्वो पक्ष्ये ॥ अधपर्वरणीत ॥ अस्मिन्कर्मण्यध्वर्युं त्वामहं
वृणे ॥ अस्यां पौर्णमास्यामध्वर्युं त्वामहं वृणे ॥ अस्यां दर्शेष्ट्या
मध्वर्युं त्वामहं वृणे ॥ अध्वर्युत्वाविष्यामीत्युक्त्वा नीर्थेभिप्रविश्य जघनेन